

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## द्वितीयकाण्डे पञ्चमः प्रश्नः

### इष्टिविधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

वि॒श्वरू॑पो वै त्वा॒ष्ट्रः पु॒रोहि॑तो दे॒वाना॑मासीथ् स्व॒स्रीयोऽसु॑राणा॒न्तस्य॒ त्रीणि॑ शी॒र्॒षाण्या॑सन्थ्
सोम॒पान॑ꣳ सु॒रा॒पान॑म॒न्नाद॑न॒ꣳ॒ स प्र॒त्यक्ष॑न्दे॒वेभ्यो॑ भा॒गम॑वदत् प॒रोक्ष॒मसु॑रेभ्यः॒ सर्व॑स्मै॒ वै
प्र॒त्यक्ष॑म्भा॒गँव्व॑द॒न्ति॒ यस्मा॑ ए॒व प॒रोक्ष॒ँव्व॑द॒न्ति॒ तस्य॑ भा॒ग उ॑दि॒तस्तस्मा॒दिन्द्रो॑ऽबिभेदी॒दृङ्वै
रा॒ष्ट्रँव्वि प॒र्या॑व॒र्तय॒तीति॒ तस्य॒ वज्र॑मा॒दाय॑ शी॒र्॒षाण्य॑च्छिन॒द्यथ् सोम॒पान॒ ॥ [१] ॥ मासी॒थ् स
क॒पिञ्ज॑लोऽभव॒त् यथ् सु॑रा॒पान॒ꣳ॒ स क॑ल॒विङ्को॒ यद॒न्नाद॑न॒ꣳ॒ स ति॑त्ति॒रिस्तस्या᳚ञ्ज॒लिना᳚ ब्रह्मह॒-
त्यामुपा॑गृह्णा॒त् ताꣳ सँ॑व्वथ्स॒रम॑बिभ॒स्तम्भू॒तान्य॒भ्य॑क्रोश॒न् ब्रह्म॑ह॒न्निति॒ स पृ॑थि॒वीमु॒पा॑सीदद॒स्यै
ब्र॑ह्मह॒त्यायै॒ तृ॒तीय॒म्प्रति॑ गृहा॒णेति॒ साऽब्र॑वी॒द्वर॑ँव्वृणै॒ खा॒तात् प॑राभवि॒ष्यन्ती॑ मन्ये॒ ततो॒ मा परा॑
भू॒वमिति॑ पु॒रा ते॑ ॥ [२] ॥ सँव्व॒थ्स॒रादपि॑ रो॒हा॒दित्य॑ब्रवी॒त् तस्मा᳚त् पु॒रा सँव्व॒थ्स॒रात् पृ॑थि॒व्यै
खा॒तमपि॑ रोहति॒ वारे॑वृत॒ꣳ॒ ह्य॑स्यै॒ तृ॒तीय॑म्ब्रह्मह॒त्यायै॒ प्रत्य॑गृह्णा॒त् तथ् स्व॑कृ॒तमिरि॑णमभव॒त्
तस्मा॒दाहि॑ताग्निः श्र॒द्धादे॑व॒ः स्व॑कृ॒त इरि॑णे॒ नाव॑ स्येद्ब्रह्मह॒त्यायै॒ ह्ये॑ष वर्ण॒ः स व॒नस्पती॒नुपा॑सी-
दद॒स्यै ब्र॑ह्मह॒त्यायै॒ तृ॒तीय॒म्प्रति॑ गृह्णी॒तेति॒ ते᳚ऽब्रुव॒न् वर॑ँव्वृणामहै वृ॒क्णात् ॥ [३] ॥ प॑राभवि॒-
ष्यन्तो॑ मन्यामहे॒ ततो॒ मा परा॑ भू॒मेत्या॒व्रश्च॑नाद् वो॒ भूया॑ꣳस॒ उत्ति॑ष्ठा॒नित्य॑ब्रवी॒त् तस्मा॑दा॒व्रश्च॑ना-
द्वृ॒क्षाणा॒म्भूया॑ꣳस॒ उत्ति॑ष्ठन्ति॒ वारे॑वृत॒ꣳ॒ ह्ये॑षा॒न्तृ॒तीय॑म्ब्रह्मह॒त्यायै॒ प्रत्य॑गृह्ण॒न्थ् स नि॒र्या॒सोऽभव॒त्
तस्मा᳚न्नि॒र्या॒सस्य॒ नाऽऽश्य॑म्ब्रह्मह॒त्यायै॒ ह्ये॑ष वर्णोऽथो॒ खलु॒ य ए॒व लोहि॑तो॒ यो वा॒ऽऽव्रश्च॑-
नान्नि॒र्येष॑ति॒ तस्य॒ नाऽऽश्य॑ ॥ [४] ॥ काम॑म॒न्यस्य॒ स स्त्रीष॑ꣳसा॒दमु॒पा॑सीदद॒स्यै ब्र॑ह्मह॒त्यायै॒

तृतीयम्प्रति गृह्णीतेति ता अब्रुवन् वरँवृणामहा ऋत्वियात् प्रजाविंन्दामहै काममा विजनितोः सम्भवामेति तस्मादृत्वियाथ् स्त्रियः प्रजाविन्दन्ते काममा विजनितोः सम्भवन्ति वारेवृतङ्ग् ह्यासान्तृतीयम्ब्रह्महत्यायै प्रत्यगृह्णन्थ् सा मलवद्वासा अभवत् तस्मान् मलवद्वाससा न सँवंदेत ॥ [५] ॥ न सहाऽऽसीत नास्या अन्नमद्याद्ब्रह्महत्यायै ह्येषा वर्णम्प्रतिमुच्याऽऽस्तेऽथो खल्वा-हुरभ्यञ्जनँवाव स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यङ्कामंमन्यदिति याम्मलवद्वाससꣳ संभवन्ति यस्ततो जायते सोऽभिशस्तो यामरण्ये तस्यै स्तेनो याम्पराचीन्तस्यै ह्रीतमुख्यपगल्भो या स्नाति तस्या अप्सु मारुको या ॥ [६] ॥ ऽभ्यङ्क्ते तस्यै दुश्चर्मा या प्रलिखते तस्यै खलति-रपमारी याऽऽङ्क्ते तस्यै काणो या दतो धावते तस्यै श्यावदन्या नखानि निकृन्तते तस्यै कुनखी या कृणत्ति तस्यै क्लीबो या रज्जुꣳ सृजति तस्या उद्बन्धुको या पर्णेन पिबति तस्या उन्मादुको या खर्वेण पिबति तस्यै खर्वस्तिस्रो रात्रीर् व्रतञ्चरेदञ्जलिना वा पिबेदखर्वेण वा पात्रेण प्रजायै गोपीथाय ॥ [७] ॥

(यथ् सोमपानं ते वृक्णात् तस्य नाश्यं वदेत मारुको या ऽखर्वेण वा त्रीणि च) ॥ १ ॥

त्वष्टा हतपुत्रो वीन्द्रꣳ सोममाऽहरत् तस्मिन्निन्द्र उपहवमैच्छत तन्नोपाह्वयत पुत्रम्मेऽवधी-रिति स यज्ञवेशसङ्कृत्वा प्रासहा सोममपिबत् तस्य यदत्यशिष्यत तत् त्वष्टाऽऽहवनीयमुप प्राव-र्तयथ् स्वाहेन्द्रशत्रुर् वर्द्धस्वेति यदवर्तयत् तद्वृत्रस्य वृत्रत्वय्यँदब्रवीथ् स्वाहेन्द्रशत्रु वर्द्धस्वेति तस्मादस्ये ॥ [८] ॥ न्द्रः शत्रुरभवथ् स संभवन्नग्नीषोमावभि समभवथ् स इषुमात्रमिषुमात्र-व्विँष्वङ्ङवर्द्धत स इमाँल्लोकानवृणोद्यदिमाँल्लोकानवृणोत् तद् वृत्रस्य वृत्रत्वन्तस्मादिन्द्रोऽबिभेथ् स प्रजापतिमुपाधाव च्छत्रुर् मेऽ जनीति तस्मै वज्रꣳ सिक्त्वा प्रायच्छदेतेन जहीति तेनाभ्या-यत तावब्रूतामग्नीषोमौ मा ॥ [९] ॥ प्र हारावमन्तः स्व इति मम वै युवङ्ग् स्थ इत्यब्रवीन् मामभ्येतमिति तौ भागधेयमैच्छेतान्ताभ्यामेतमग्नीषोमीयमेकादशकपालम्पूर्णमासे प्रायच्छत् तावब्रूतामभि सन्दष्टौ वै स्वो न शक्नुव ऐतुमिति स इन्द्र आत्मनः शीतरूरावजनयत् तच्छी-तरूरयोर् जन्म य एवꣳ शीतरूरयोर्जन्म वेद ॥ [१०] ॥ नैनꣳ शीतरूरौ हतस्ताभ्यामे-नमभ्यनयत् तस्माज्जञ्जभ्यमानादग्नीषोमौ निरक्रामताम्प्राणापानौ वा एनन्तदजहिताम्प्राणो वै

दक्षोऽपानः क्रतुस्तस्माज्जञ्जभ्यमानो ब्रूयान्मयि दक्षक्रतू इति प्राणापानावेवाऽऽत्मन् धत्ते सर्वमायुरेति स देवता वृत्रान्निर्हूय वार्त्रघ्नꣳ हविः पूर्णमासे निरवपद् घ्नन्ति वा एनम्पूर्णमास आ ॥ [११] ॥ ऽमावास्यायाम्प्यायन्ति तस्माद्वार्त्रघ्नी पूर्णमासेऽनूच्येते वृधन्वती अमावास्यायान्तथ् सꣳस्थाप्य वार्त्रघ्नꣳ हविर् वज्रमादाय पुनरभ्यायत ते अब्रूतान्द्यावापृथिवी मा प्र हारावयोर् वै श्रित इति ते अब्रूताँव्वरँव्वृणावहै नक्षत्रविहिताऽहमसानीत्यसावब्रवी चित्रविहिताऽहमितीयन्तस्मान्नक्षत्रविहिताऽसौ चित्रविहितेऽयय्ँय एवन्द्यावापृथिव्योर् ॥ [१२] ॥ वरँव्वेदैनँव्वरो गच्छति स आभ्यामेव प्रसूत इन्द्रो वृत्रमहन् ते देवा वृत्रꣳ हत्वाऽग्नीषोमावब्रुवन् हव्यन्नो वहतमिति तावब्रूतामप तेजसौ वै त्यौ वृत्रे वै त्ययोस्तेज इति तेऽब्रुवन् क इदमच्छैतीति गौरित्यब्रुवन् गौर् वाव सर्वस्य मित्रमिति साऽब्रवी ॥ [१३] ॥ द्वरँव्वृणै मय्येव सतोऽभयेन भुनजाद्ध्वा इति तद्गौराऽहरत् तस्माद्गवि सतोभयेन भुञ्जत एतद्वा अग्नेस्तेजो यद् घृतमेतथ् सोमस्य यत् पयो य एवमग्नीषोमयो स्तेजो वेद तेजस्व्येव भवति ब्रह्मवादिनो वदन्ति किन्देवत्यम्पौर्णमासमिति प्राजापत्यमिति ब्रूयात् तेनेन्द्रञ्ज्येष्ठम्पुत्रन्निरवासाययदिति तस्मा ज्ज्येष्ठम्पुत्रन्धनेन निरवसाययन्ति ॥ [१४] ॥

(अस्य मा वेदा द्यावापृथिव्यो रब्रवी दिति तस्मा च्चत्वारि च) ॥ २ ॥

⋆

इन्द्रँव्वृत्रञ्जघ्निवाꣳसम्मृधोऽभि प्रावेपन्त स एतव्वैमृधम्पूर्णमासेऽनुनिर्वाप्यमपश्यत् तन्निरवपत् तेन वै स मृधोऽपाहत यद्वैमृधः पूर्णमासेऽनुनिर्वाप्यो भवति मृध एव तेन यजमानोऽप हत इन्द्रो वृत्रꣳ हत्वा देवताभिश्चेन्द्रियेण च व्यार्ध्यत स एतमाग्नेय मष्टाकपालममावास्यायामपश्यदैन्द्रन्दधि ॥ [१५] ॥ तन्निरवपत् तेन वै स देवताश्चेन्द्रियञ्चावारुन्ध यदाग्नेयोऽष्टाकपालोऽमावास्यायाम्भवत्यैन्द्रन्दधि देवताश्चैव तेनेन्द्रियञ्च यजमानोऽव रुन्ध इन्द्रस्य वृत्रञ्जघ्नुष इन्द्रियँव्वीर्यम्पृथिवीमनु व्यार्च्छत् तदोषधयो वीरुधोऽभवन्थ् स प्रजापति मुपाधावद्वृत्रम्मे जघ्नुष इन्द्रियँव्वीर्यं ॥ [१६] ॥ पृथिवीमनु व्यारत् तदोषधयो वीरुधोऽभूवन्निति स प्रजापतिः पशूनब्रवीदेतदस्मै सन्नयतेति तत् पशव ओषधीभ्योऽध्यात्मन्थ् समनयन् तत् प्रत्यदुहन्यथ् समनयन् तथ् सांनाय्यस्य सांनाय्यत्वय्ँयत् प्रत्यदुहन् तत् प्रतिधुषः प्रतिधुक्त्वꣳ समनैषुः प्रत्य-

धुख्ष॒न् न तु मयि॑ श्रय॒त इत्य॑ब्रवीदे॒तद॑स्मै ॥ [१७] ॥ शृ॒तङ्कु॑रु॒तेत्य॑ब्रवी॒त् तद॑स्मै शृ॒तम॑-
कुर्व॑न्निन्द्रि॒यँव्वावास्मि॑न् वी॒र्य॑न्तद॑श्रय॒न् तच्छृ॒तस्य॑ शृ॒तत्वꣳ सम॑नैषुः प्रत्य॑धुख्षञ्छृ॒तम॑क्र॒न् न
तु मा॑ धिनो॒तीत्य॑ब्रवीदे॒तद॑स्मै दधि॑ कु॒रु॒तेत्य॑ब्रवी॒त् तद॑स्मै दद्ध्य॑कुर्व॒न् तदे॑नमधिनो॒त् तद्द॒द्ध्नो
द॑धि॒त्वम्ब्र॑ह्मवा॒दिनो॑ वदन्ति द॒द्ध्नः पूर्व॑स्याव॒दे॒यं ॥ [१८] ॥ दधि॒ हि पूर्वं॑ क्रि॒यत॒ इत्यना॑दृत्य॒
तच्छृ॒तस्यै॒व पूर्व॑स्याव॑ द्येदिन्द्रि॒यमे॒वास्मि॑न् वी॒र्यꣳ॑ श्रि॒त्वा द॒द्ध्नोपरि॑ष्टाद् धिनोति यथापू॒र्वमुपै॑ति॒
यत् पू॒तीकै᳚र् वा पर्ण॒वल्कै॑र् वाऽऽत॒ञ्च्याथ् सौ॒म्यन्तद्यत् क्व॑लै राख्ष॒सन्तद्यत् त॑ण्डु॒लैर् वै᳚श्वदे॒वन्त-
द्यदा॒तञ्च॑नेन मानु॒षन्तद्यद्द॒द्ध्ना तथ् सेन्द्रं॑ द॒द्ध्नाऽऽत॑नक्ति ॥ [१९] ॥ सेन्द्र॒त्वाया᳚ग्निहो॑त्रोच्छे-
ष॒णम॒भ्यात॑नक्ति य॒ज्ञस्य॒ सन्त॑त्या॒ इन्द्रो॑ वृ॒त्रꣳ ह॒त्वा परा᳚ं परा॒वत॑मगच्छ॒दपा॑रा॒धमि॒ति॒ मन्य॑मा-
न॒स्तन्दे॒वता॒ः प्रैष॑मैच्छ॒न्थ् सो᳚ऽब्रवीत् प्र॒जाप॑ति॒र्यः प्र॑थ॒मो॑ऽनु॒वि॒न्द॒ति॒ तस्य॑ प्रथ॒मम्भा॑ग॒धे॒यमि॒ति
तम्पि॒तरो॒ऽन्व॑विन्द॒न् तस्मा᳚त् पि॒तृभ्य॑ः पू॒र्वे॒द्युः क्रि॑यते॒ सो᳚ऽमावा॒स्या᳚म्प्रत्याऽ*ग॑च्छ॒त् तन्दे॒वा
अ॒भि सम॑गच्छ॒न्ता॒मा वै नो॒ ॥ [२०] ॥ ऽद्य वसु॑ वस॒तीतीन्द्रो॒ हि दे॒वाना॒ँव्वसु॒ तद॑मावा॒स्या॑या
अमावा॒स्य॒त्वम्ब्र॑ह्मवा॒दिनो॑ वदन्ति॒ किंदे॒वत्य॑ꣳ सांना॒य्यमिति॑ वैश्वदे॒वमिति॑ ब्रूया॒द्विश्वे॒ हि तद्दे॒वा
भा॑ग॒धे॒य॑म॒भि स॒मग॑च्छ॒न्तेत्यथो॒ खल्वै॒न्द्रमि॒त्ये॒व ब्रू॒या॒दिन्द्र॒ँव्वाव ते तद्भि॒षज्य॒न्तो॒ऽभि सम॑ग-
च्छ॒न्तेति॑ ॥ [२१] ॥

(दधि॑ मे ज॒घ्नुष॑ इन्द्रि॒यँव्वी॒र्यं॑ मित्य॑ब्रवीदे॒तद॑स्मा अ॒व॒दे॒यं॑ तनक्ति नो॒ द्विच॑त्वारिꣳशच्च) ॥ ३ ॥

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति॒ स त्वै द॑र्॒शपूर्णमा॒सौ य॑जेत॒ य ए॑नौ॒ सेन्द्रौ॒ य॒जेतेति॑ वैमृ॒धः पू॒र्णमा॑सेऽनु-
नि॒र्वा॒प्यो॑ भवति॒ तेन॑ पू॒र्णमा॑सः सेन्द्र॑ ऐ॒न्द्रन्दद्ध्य॑मावा॒स्या॑या॒न्तेना॑मावा॒स्या॑ सेन्द्रा॒ य ए॒वँ॑व्वि॒द्वान्
द॑र्॒शपूर्णमा॒सौ यज॑ते॒ सेन्द्रा॑वि॒वैनौ॑ यजते॒ श्वःश्वो॑ऽस्मा ईजा॒नाय॒ वसी॑यो भवति दे॒वा वै य॒ज्ञेऽकु॑-
र्वत॒ तद॒सु॑रा अकुर्वत॒ ते दे॒वा ए॒ता ॥ [२२] ॥ मिष्टि॑मपश्यन्नाग्नावैष्ण॒वमेका॑दशकपाल॒ꣳ॒ सर॑-
स्वत्यै च॒रुꣳ सर॑स्वते च॒रुन्ताम्पौ᳚र्णमा॒सꣳ स॒ꣳ॒स्थाप्यानु॒ निर॑वप॒न् ततो॑ दे॒वा अभ॑व॒न् पराऽसु॑रा॒
यो भ्रातृ॑व्यवा॒न्थ् स्याथ् स पौ᳚र्णमा॒सꣳ स॒ꣳ॒स्थाप्यै॒तामिष्टि॒मनु॒ निर्व॑पेत् पौर्णमा॒सेनै॒व वज्र॒म्भ्रा-
तृ॑व्याय॒ प्रहृ॒त्या᳚ऽऽग्नावैष्ण॒वेन॑ दे॒वता᳚श्च य॒ज्ञञ्च॒ भ्रातृ॑व्यस्य वृङ्क्ते मि॒थु॒नान् प॒शून्थ् सार॑स्व॒ता-
भ्या॒ँय्याव॑द्दे॒वास्यास्ति॒ तथ् ॥ [२३] ॥ सर्वँ॑व्वृङ्क्ते पौर्णमा॒सीमे॒व य॑जेत॒ भ्रातृ॑व्यवा॒न्नामा॑वा॒स्या॑ꣳ

हत्वा भ्रातृव्यं नाऽऽप्याययति साकंप्रस्थायीयेन यजेत पशुकामो यस्मै वा अल्पेनाऽऽहरन्ति नाऽऽत्मना तृप्यति नान्यस्मै ददाति यस्मै महता तृप्यत्यात्मना ददात्यन्यस्मै महता पूर्णꣳ होतव्यन्तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति दारुपात्रेण जुहोति न हि मृन्मयमाहुतिमानश औदुंबरं ॥ [२४] ॥ भवत्यूर्वा उदुंबर ऊर्क् पशव ऊर्जैवास्मा ऊर्जम्पशूनव रुन्धे नागतश्रीर् महेन्द्रय्ँयजेत त्रयो वै गतश्रियः शुश्रुवान् ग्रामणी राजन्यस्तेषाम्महेन्द्रो देवता यो वै स्वां देव-तामति यजते प्र स्वायै देवतायै च्यवते न पराम्प्राप्नोति पापीयान् भवति सँव्वथ्सरमिन्द्रय्ँय-जेत सँव्वथ्सरꣳ हि व्रतन्नाति स्वै ॥ [२५] ॥ वैनन्देवतेज्यमाना भूत्या इन्धे वसीयान् भवति सँव्वथ्सरस्य परस्तादग्नये व्रतपतये पुरोडाशमष्टाकपालन्निर्वपेथ् सँव्वथ्सरमेवैनव्ँवृत्रञ्जघ्निवाꣳ-समग्निर् व्रतपतिर् व्रतमा लंभयति ततोऽधि कामय्ँयजेत ॥ [२६] ॥

(एतां त दौदुंबरङ्ँ स्वात्रिꣳशच्च) ॥ ४ ॥

नासोमयाजी सन्नयेदनागतव्ँवा एतस्य पयो योऽसोमयाजी यदसोमयाजी संनयेत् परिमोष एव सोऽनृतङ्करोत्यथो परैव सिच्यते सोमयाज्येव सन्नयेत् पयो वै सोमः पयः सांनाय्यम्पयसैव पय आत्मन् धत्ते वि वा एतम्प्रजया पशुभिरर्द्धयति वर्द्धयत्यस्य भ्रातृव्यय्ँयस्य हविर् निरुप्तम्पुर-स्ताच्चन्द्रमा ॥ [२७] ॥ अभ्युदेति त्रेधा तण्डुलान्वि भजेद्ये मद्ध्यमाः स्युस्तानग्नये दात्रे पुरो-डाशमष्टाकपालङ्कुर्याद्ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधꣳश्चरुय्ँयेऽणिष्ठा स्तान् विष्णवे शिपिवि-ष्टाय श्रृते चरुमग्निरेवास्मै प्रजाम्प्रजनयति वृद्धामिन्द्रः प्र यच्छति यज्ञो वै विष्णुः पशवः शिपिर् यज्ञ एव पशुषु प्रति तिष्ठति न द्वे ॥ [२८] ॥ यजेत यत् पूर्वया संप्रति यजेतोत्तरया छंबट् कुर्याद्यदुत्तरया संप्रति यजेत पूर्वया छंबट् कुर्यान्नेष्टिर् भवति न यज्ञस्तदनु ह्रीतमुख्यपगल्भो जायत एकामेव यजेत प्रगल्भोऽस्य जायतेऽनादृत्य तद् द्वे एव यजेत यज्ञमुखमेव पूर्वयाऽऽल-भते यजत उत्तरया देवता एव पूर्वयाऽवरुन्ध इन्द्रियमुत्तरया देवलोकमेव ॥ [२९] ॥ पूर्व-याऽभिजयति मनुष्यलोकमुत्तरया भूयसो यज्ञक्रतूनुपैत्येषा वै सुमना नामेष्टिर् यमद्येजानम्पश्चा-च्चन्द्रमा अभ्युदेत्यस्मिन्नेवास्मै लोकेऽर्द्धुकम्भवति दाख्षायणयज्ञेन सुवर्गकामो यजेत पूर्णमासे सन्नयेन्मैत्रावरुण्याऽऽमिख्षयाऽमावास्यायाय्ँयजेत पूर्णमासे वै देवानाꣳ सुतस्तेषामेतमर्द्धमा-

सम्प्रसुतस्तेषाम्मैत्रावरुणी वशाऽमावास्यायामनूबन्ध्या यत् ॥ [३०] ॥ पूर्वेद्युर् यजते वेदि-
मेव तत् करोति यद् वथ्सानपाकरोति सदोहविर्द्धाने एव सं मिनोति यद्यजते देवैरेव सुत्याꣳ
सम्पादयति स एतमर्द्धमासꣳ सधमादन्देवैः सोमम्पिबति यन्मैत्रावरुण्याऽऽमिक्षयाऽमावा-
स्यायाय्ँयजते यैवासौ देवानाव्ँवशाऽनूबन्ध्या सो एवैषैतस्य साक्षाद्वा एष देवानभ्यारोहति य
एषाय्ँयज्ञ ॥ [३१] ॥ मभ्यारोहति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्य-
वविद्ध्यति पापीयान् भवति यदि नावविद्ध्यति सदृङ् व्यावृत्काम एतेन यज्ञेन यजेत क्षुरपविर्
ह्येष यज्ञस्ताजक् पुण्यो वा भवति प्र वा मीयते तस्यैतद् व्रतन्नानृतव्ँवदेन्न माꣳसमश्नीयान्न
स्त्रियमुपेयान्नास्य पल्पूलनेन वासः पल्पूलयेयु रेतद्धि देवाः सर्वन्न कुर्वन्ति ॥ [३२] ॥

(चन्द्रमा द्वे देवलोकमेव यद् यज्ञं पल्पूलयेयुः षट् च) ॥ ५ ॥

एष वै देवरथो यद्दर्शपूर्णमासौ यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते रथस्पष्ट एवावसाने वरे
देवानामव स्यत्येतानि वा अङ्गापरूꣳषि सव्ँवथ्सरस्य यद्दर्शपूर्णमासौ य एवव्ँविद्वान् दर्शपू-
र्णमासौ यजतेऽङ्गापरूꣳष्येव सव्ँवथ्सरस्य प्रति दधात्येते वै सव्ँवथ्सरस्य चक्षुषी यद्दर्शपूर्ण-
मासौ य एवव्ँविद्वान् दर्शपूर्णमासौ यजते ताभ्यामेव सुवर्गल्ँलोकमनु पश्य ॥ [३३] ॥ त्येषा वै
देवानाव्ँविक्रान्तिर् यद्दर्शपूर्णमासौ य एवव्ँविद्वान् दर्शपूर्णमासौ यजते देवानामेव विक्रान्तिमनु
वि क्रमत एष वै देवयानः पन्था यद्दर्शपूर्णमासौ य एवव्ँविद्वान् दर्शपूर्णमासौ यजते य एव देव-
यानः पन्थास्तꣳ समारोहत्येतौ वै देवानाꣳ हरी यद्दर्शपूर्णमासौ य एवव्ँविद्वान् दर्शपूर्णमासौ
यजते यावेव देवानाꣳ हरी ताभ्या ॥ [३४] ॥ मेवैभ्यो हव्यव्ँवहत्येतद्वै देवानामास्यय्ँयद्दर्श-
पूर्णमासौ य एवव्ँविद्वान् दर्शपूर्णमासौ यजते साक्षादेव देवानामास्ये जुहोत्येष वै हविर्द्धानी
यो दर्शपूर्णमासयाजी सायंप्रातरग्निहोत्रञ्जुहोति यजते दर्शपूर्णमासावहरहर् हविर्द्धानिनाꣳ
सुतो य एवव्ँविद्वान् दर्शपूर्णमासौ यजते हविर्द्धान्यस्मीति सर्वमेवास्य बर्हिष्यन्दत्तम्भवति
देवा वा अहर् ॥ [३५] ॥ यज्ञियन्नाविन्दन् ते दर्शपूर्णमासावपुनन् तौ वा एतौ पूतौ मेद्ध्यौ
यद्दर्शपूर्णमासौ य एवव्ँविद्वान् दर्शपूर्णमासौ यजते पूतावेवैनौ मेद्ध्यौ यजते नामावास्याञ्च
पौर्णमास्याञ्च स्त्रियमुपेयाद्यदुपेयान्निरिन्द्रियः स्यात् सोमस्य वै राज्ञोऽर्द्धमासस्य रात्रयः पत्नय

आसन् तासाममावास्याञ्च पौर्णमासीञ्च नोपैत् ॥ [३६] ॥ ते एनमभि समनह्येतान्तय्ँयरक्ष्म आर्च्छद्राजानय्ँयक्ष्म आरदिति तद्राजयक्ष्मस्य जन्म यत् पापीयानभवत् तत् पापयक्ष्मस्य यज्जायाभ्यामविन्दत् तज्जायेन्यस्य य एवमेतेषाय्ँयक्ष्माणाञ्जन्म वेद नैनमेते यक्ष्मा विन्दन्ति स एते एव नमस्यन्नुपाधावत् ते अब्रूताव्ँवरव्ँवृणावहा आवन्देवानाम्भागधे असावा ॥ [३७] ॥ ऽऽवदधि देवा इज्यान्ता इति तस्माथ् सदृशीनाꣳ रात्रीणाममावास्यायाञ्च पौर्णमास्याञ्च देवा इज्यन्त एते हि देवानाम्भागधे भागधा अस्मै मनुष्या भवन्ति य एवव्ँवेद भूतानि क्षुधमघ्नन्थ् सद्यो मनुष्या अर्द्धमासे देवा मासि पितरः सव्ँवथ्सरे वनस्पतयस्तस्मादहरहर् मनुष्या अशनमिच्छन्तेऽर्द्धमासे देवा इज्यन्ते मासि पितृभ्यः क्रियते सव्ँवथ्सरे वनस्पतयः फलङ्गृह्णन्ति य एवव्ँवेद हन्ति क्षुधम्भ्रातृव्यम् ॥ [३८] ॥

(पश्यति ताभ्या महे रै दसाव फलꣳ सप्त च) ॥ ६ ॥

देवा वै नर्चि न यजुष्यश्रयन्त ते सामन्नेवाश्रयन्त हिङ्करोति सामैवाकर्हिं करोति यत्रैव देवा अश्रयन्त तत एवैनान् प्र युङ्क्ते हिङ्करोति वाच एवैष योगो हिं करोति प्रजा एव तद्यजमानः सृजते त्रिः प्रथमामन्वाह त्रिरुत्तमाय्ँयज्ञस्यैव तद् बर्सं ॥ [३९] ॥ नह्यत्यप्रस्रꣳसाय सन्ततमन्वाह प्राणानामन्नाद्यस्य सन्तत्या अथो रक्षसामपहत्यै राथन्तरीम्प्रथमामन्वाह राथन्तरो वा अयल्ँलोक इममेव लोकमभि जयति त्रिर् वि गृह्णाति त्रय इमे लोका इमानेव लोकानभि जयति बार्हतीमुत्तमामन्वाह बार्हतो वा असौ लोकोऽमुमेव लोकमभि जयति प्र वो ॥ [४०] ॥ वाजा इत्यनिरुक्ताम्प्राजापत्यामन्वाह यज्ञो वै प्रजापतिर् यज्ञमेव प्रजापतिमा रभते प्र वो वाजा इत्यन्वाहान्नव्ँवै वाजोऽन्नमेवाव रुन्धे प्र वो वाजा इत्यन्वाह तस्मात् प्राचीनꣳ रेतो धीयतेऽग्न आ याहि वीतय इत्याह तस्मात् प्रतीचीः प्रजा जायन्ते प्र वो वाजा ॥ [४१] ॥ इत्यन्वाह मासा वै वाजा अर्द्धमासा अभिद्यवो देवा हविष्मन्तो गौर् घृताची यज्ञो देवाञ्जिगाति यजमानः सुम्नयुरिदमसीदमसीत्येव यज्ञस्य प्रियन्धामाव रुन्धे यङ्कामयेत सर्वमायुरियादिति प्र वो वाजा इति तस्यानूच्याग्न आ याहि वीतय इति सन्ततमुत्तरमर्द्धर्चमा लभेत ॥ [४२] ॥ प्राणेनैवास्यापानन्दाधार सर्वमायुरेति यो वा अरत्निꣳ सामिधेनीनाव्ँवेदारत्नावेव भ्रातृव्यङ्कुरुतेऽर्द्धर्चौ सन्द-

धात्येष वा अरत्निः सामिधेनीनाय्ँय एवव्ँवेदारत्नावेव भ्रातृव्यङ्कुरुत ऋषेर्ऋषेर्वा एता निर्मिता यथ् सामिधेन्यस्ता यदसय्ँयुक्ताः स्युः प्रजया पशुभिर् यजमानस्य वि तिष्ठेरन्नर्द्धर्चौ सन्दधाति सय्ँयुनक्त्येवैनास्ता अस्मै सय्ँयुक्ता अवरुद्धाः सर्वामाशिषन्दुह्रे ॥ [४३] ॥

(बरुसं वो जायन्ते प्रवो वाजा लभेत दधाति सं दश च) ॥ ७ ॥

अयज्ञो वा एष योऽसामाऽग्न आ याहि वीतय इत्याह रथन्तरस्यैष वर्णस्तन्त्वा समिद्भिरङ्गिर इत्याह वामदेव्यस्यैष वर्णो बृहदग्ने सुवीर्यमित्याह बृहत एष वर्णो यदेतं तृचमन्वाह यज्ञमेव तथ् सामन्वन्तङ्करोत्यग्निरमुष्मिँल्लोक आसीदादित्योऽस्मिन् ताविमौ लोकावशान्ता ॥ [४४] ॥ वास्तान्ते देवा अब्रुवन्नेतेमौ वि पर्यूहामेत्यग्न आ याहि वीतय इत्यस्मिँल्लोकेऽग्निमदधुर् बृहदग्ने सुवीर्यमित्यमुष्मिँल्लोक आदित्यन्ततो वा इमौ लोकावशाम्यताय्ँयदेवमन्वाहानयोर् लोकयोः शान्त्यै शाम्यतोऽस्मा इमौ लोकौ य एवव्ँवेद पञ्चदश सामिधेनीरन्वाह पञ्चदश ॥ [४५] ॥ वा अर्द्धमासस्य रात्रयोऽर्द्धमासशः सव्ँवथ्सर आप्यते तासान्त्रीणि च शतानि षष्टिश्चाक्षराणि तावतीः सव्ँवथ्सरस्य रात्रयोऽक्षरश एव सव्ँवथ्सरमाप्नोति नृमेधश्च परुच्छेपश्च ब्रह्मवाद्यमवदेतामस्मिन् दारावार्द्रेऽग्निञ्जनयाव यतरो नौ ब्रह्मीयानिति नृमेधोऽभ्यवदथ् स धूममजनयत् परुच्छेपोऽभ्यवदथ् सोऽग्निमजनयदृष इत्यब्रवीद् ॥ [४६] ॥ यथ् समावद् विद्म कथा त्वमग्निमजीजनो नाहमिति सामिधेनीनामेवाहव्ँवर्णव्ँवेदेत्यब्रवीद्यद् घृतवत् पदमनूच्यते स आसाव्ँवर्णस्तन्त्वा समिद्भिरङ्गिर इत्याह सामिधेनीष्वेव तज्ज्योतिर् जनयति स्त्रियस्तेन यदृचः स्त्रियस्तेन यद् गायत्रियः स्त्रियस्तेन यथ् सामिधेन्यो वृषण्वतीमन्वाह ॥ [४७] ॥ तेन पुꣳस्वतीस्तेन सेन्द्रास्तेन मिथुना अग्निर् देवानान्दूत आसीदुशना काव्योऽसुराणान्तौ प्रजापतिम्प्रश्नमैताꣳ स प्रजापतिरग्निन्दूतव्ँवृणीमह इत्यभि पर्यावर्तत ततो देवा अभवन् पराऽसुरा यस्यैवव्ँविदुषोऽग्निन्दूतव्ँवृणीमह इत्यन्वाह भवत्यात्मना पराऽस्य भ्रातृव्यो भवत्यद्ध्वरवतीमन्वाह भ्रातृव्यमेवैतया ॥ [४८] ॥ ध्वरति शोचिष्केशस्तमीमह इत्याह पवित्रमेवैतद् यजमानमेवैतया पवयति समिद्धो अग्न आहुतेत्याह परिधिमेवैतम्परि दधात्यस्कन्दाय यदत ऊर्द्ध्वमभ्यादद्ध्याद्यथा बहिःपरिधि स्कन्दति तादृगेव तत् त्रयो वा अग्नयो हव्यवाहनो देवानाङ्कव्यवाहनः पितृणाꣳ

सहरक्षा असुराणान्त एतर्ह्यां शꣳसन्ते माव्ँवँरिष्यते मा ॥ [४९] ॥ मिति वृणीद्ध्वꣳ हव्य-
वाहनमित्याह य एव देवानान्तव्ँवृणीत आर्षेयव्ँवृणीते बन्धोरेव नैत्यथो सन्तत्यै परस्तादर्वाचो
वृणीते तस्मात् परस्तादर्वाञ्चो मनुष्यान् पितरोऽनु प्र पिपते ॥ [५०] ॥

(अशान्ता वाह पञ्चदशा ब्रवी दन्वाहै तया वरिष्यते मा मेकान्नत्रिꣳशच्च) ॥ ८ ॥

अग्ने महाꣳ असीत्याह महान्ह्येष यदग्निर् ब्राह्मणेत्याह ब्राह्मणो ह्येष भारतेत्याहैष हि देवेभ्यो
हव्यम्भरति देवेद्ध इत्याह देवा ह्येतमैन्धत मन्विद्ध इत्याह मनुर्ह्येतमुत्तरो देवेभ्य ऐन्धरृषिष्टुत
इत्याहरृषयो ह्येतमस्तुवन् विप्रानुमदित इत्याह ॥ [५१] ॥ विप्रा ह्येते यच्छुश्रुवाꣳसः कवि-
शस्त इत्याह कवयो ह्येते यच्छुश्रुवाꣳसो ब्रह्मसꣳशित इत्याह ब्रह्मसꣳशितो ह्येष घृताहवन
इत्याह घृताहुतिर् ह्यस्य प्रियतमा प्रणीर् यज्ञानामित्याह प्रणीर् ह्येष यज्ञानाꣳ रथीरद्ध्वराणा-
मित्याहैष हि देवरथोऽतूर्तो होतेत्याह न ह्येतङ्कश्चन ॥ [५२] ॥ तरति तूर्णिर्हव्यवाडित्याह
सर्वꣳ ह्येष तरत्यास्पात्रञ्जुहूर् देवानामित्याह जुहूर् ह्येष देवानाञ्चमसो देवपान इत्याह चमसो
ह्येष देवपानोऽराꣳ इवाग्ने नेमिर् देवाꣳस्त्वं परिभूरसीत्याह देवान्ह्येष परिभूर्यद्ब्रूयादा वह देवान्
देवयते यजमानायेति भ्रातृव्यमस्मै ॥ [५३] ॥ जनयेदा वह देवान् यजमानायेत्याह यजमा-
नमेवैतेन वर्द्धयत्यग्निमग्न आ वह सोममा वहेत्याह देवता एव तद्यथापूर्वमुप ह्वयत आ चाग्ने
देवान्वह सुयजा च यज जातवेद इत्याहाग्निमेव तथ् सꣳ श्यति सोऽस्य सꣳशितो देवेभ्यो
हव्यव्ँवहत्यग्निर्होते ॥ [५४] ॥ त्याहाग्निर् वै देवानाꣳ होता य एव देवानाꣳ होता तव्ँवृणीते
स्मो वयमित्याहाऽऽत्मानमेव सत्त्वङ्गमयति साधु ते यजमान देवतेत्याहा ऽऽशिषमेवैतामा
शास्ते यद्ब्रूयाद्योऽग्निꣳ होतारमवृथा इत्यग्निनोभयतो यजमानं परि गृह्णीयात् प्रमायुकः स्याद्य-
जमानदेवत्या वै जुहूर् भ्रातृव्यदेवत्योपभृद् ॥ [५५] ॥ यद्वे इव ब्रूयाद् भ्रातृव्यमस्मै जनयेद्
घृतवतीमद्ध्वर्यो स्रुचमाऽस्यस्वेत्याह यजमान मेवैतेन वर्द्धयति देवायुवमित्याह देवान्ह्ये-
षाऽवति विश्ववारामित्याह विश्वꣳ ह्येषाऽवतीडामहै देवाꣳ ईडेन्यान् नमस्याम नमस्यान्यजाम
यज्ञियानित्याह मनुष्या वा ईडेन्याः पितरो नमस्या देवा यज्ञिया देवता एव तद्यथाभागय्ँय-
जति ॥ [५६] ॥

(विप्रानुमदित इत्याह चना ऽस्मै होतो पभृद् देवता एव त्रीणि च) ॥ ९ ॥

त्रीꣳस्तृचाननु ब्रूयाद्राजन्यस्य त्रयो वा अन्ये राजन्यात् पुरुषा ब्राह्मणो वैश्यः शूद्रस्तानेवास्मा अनुकान् करोति पञ्चदशाननु ब्रूयाद् राजन्यस्य पञ्चदशो वै राजन्यः स्व एवैनꣳ स्तोमे प्रति ष्ठापयति त्रिष्टुभा परि दध्यादिन्द्रियँवै त्रिष्टुगिन्द्रियकामः खलु वै राजन्यो यजते त्रिष्टुभैवास्मा इन्द्रियम्परि गृह्णाति यदि कामयेत ॥ [५७] ॥ ब्रह्मवर्चसमस्त्विति गायत्रिया परि दध्याद्ब्रह्मवर्चसँवै गायत्री ब्रह्मवर्चसमेव भवति सप्तदशाननु ब्रूयाद्वैश्यस्य सप्तदशो वै वैश्यः स्व एवैनꣳ स्तोमे प्रति ष्ठापयति जगत्या परि दध्याज्जागता वै पशवः पशुकामः खलु वै वैश्यो यजते जगत्यैवास्मै पशून् परि गृह्णात्येकविꣳशतिमनु ब्रूयात् प्रतिष्ठाकामस्यैकविꣳशः स्तोमानाम्प्रतिष्ठा प्रतिष्ठित्यै ॥ [५८] ॥ चतुर्विꣳशतिमनु ब्रूयाद्ब्रह्मवर्चसकामस्य चतुर्विꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसङ्गायत्रियैवास्मै ब्रह्मवर्चसमव रुन्धे त्रिꣳशतमनु ब्रूयादन्नकामस्य त्रिꣳशदक्षरा विराडन्नँविराड् विराजैवास्मा अन्नाद्यमव रुन्धे द्वात्रिꣳशतमनु ब्रूयात् प्रतिष्ठाकामस्य द्वात्रिꣳशदक्षराऽनुष्टुगनुष्टुप् छन्दसाम्प्रतिष्ठा प्रतिष्ठित्यै षट्त्रिꣳशतमनु ब्रूयात् पशुकामस्य षट्त्रिꣳशदक्षरा बृहती बार्हताः पशवो बृहत्यैवास्मै पशू ॥ [५९] ॥ नव रुन्धे चतुश्चत्वारिꣳशतमनु ब्रूयादिन्द्रियकामस्य चतुश्चत्वारिꣳशदक्षरा त्रिष्टुगिन्द्रियन्त्रिष्टुप् त्रिष्टुभैवास्मा इन्द्रियमव रुन्धेऽष्टाचत्वारिꣳशतमनु ब्रूयात् पशुकामस्याष्टाचत्वारिꣳशदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धे सर्वाणि छन्दाꣳस्यनु ब्रूयाद्बहुयाजिनः सर्वाणि वा एतस्य छन्दाꣳस्यवरुद्धानि यो बहुयाज्यपरिमितमनु ब्रूयादपरिमितस्यावरुद्ध्यै ॥ [६०] ॥

(कामयेतप्रतिष्ठित्यैपशून्थ्सप्तचत्वारिꣳशच्च) ॥ १० ॥

निवीतम्मनुष्याणाम्प्राचीनावीतम्पितृणामुपवीतन्देवानामुप व्ययते देवलक्ष्ममेव तत् कुरुते तिष्ठन्नन्वाह तिष्ठन्ह्याश्रुततरँवदति तिष्ठन्नन्वाह सुवर्गस्य लोकस्याभिजित्या आसीनो यजत्यस्मिन्नेव लोके प्रति तिष्ठति यत् क्रौञ्चमन्वाहाऽऽसुरन्तद्यन्मन्द्रम्मानुषन्तद्यदन्तरा तथ् सदेवम-

न्तराऽनूच्यꣳ सदेवत्वाय विद्वाꣳसो वै ॥ [६१] ॥ पुरा होतारोऽभूवन् तस्माद्विधृता अद्ध्वा-
नोऽभूवन् न पन्थानः समरुख्षन्नन्तर्वेद्यन्यः पादो भवति बहिर्वेद्यन्योऽथान्वाहाद्ध्वनाव्वि-
धृत्यै पथामसꣳरोहायाथो भूतञ्चैव भविष्यच्चाव रुन्धेऽथो परिमितञ्चैवापरिमितञ्चाव रुन्धेऽथो
ग्राम्याꣳश्चैव पशूनारण्याꣳश्चाव रुन्धेऽथो ॥ [६२] ॥ देवलोकञ्चैव मनुष्यलोकञ्चाभि जयति
देवा वै सामिधेनीरनूच्य यज्ञन्नान्वपश्यन्थ् स प्रजापतिस्तूष्णीमाघारमाऽघारयत् ततो वै देवा
यज्ञमन्वपश्यन्यत् तूष्णीमाघारमाघारयति यज्ञस्यानुख्यात्या अथो सामिधेनीरेवाभ्यनक्त्य-
लूꣳख्षो भवति य एवव्वेदाथो तर्पयत्येवैनास्तृप्यति प्रजया पशुभिर् ॥ [६३] ॥ य एवव्वेद यदे-
कयाऽऽघारयेदेकाम्प्रीणीयाद्यद् द्वाभ्यान्द्वे प्रीणीयाद्यद् तिसृभिरति तद्रेचयेन् मनसाऽऽघारयति
मनसा ह्यनाप्तमाप्यते तिर्यञ्चमा घारयत्यच्छंबट्कारव्वाक् च मनश्चाऽऽर्तीयेतामहन्देवेभ्यो हव्य-
व्वहामीति वागब्रवीदहन्देवेभ्य इति मनस्तौ प्रजापतिम्प्र श्नमैताꣳ सोऽब्रवीत् ॥ [६४] ॥
प्रजापतिर् दूतीरेव त्वम्मनसोऽसि यद्धि मनसा ध्यायति तद्वाचा वदतीति तत् खलु तुभ्यन्न
वाचा जुहवन्नित्यब्रवीत् तस्मान्मनसा प्रजापतये जुह्वति मन इव हि प्रजापतिः प्रजापतेराप्त्यै
परिधीन्थ् सम्मार्ष्टि पुनात्येवैनान् त्रिर् मद्ध्यमन्त्रयो वै प्राणाः प्राणानेवाभि जयति त्रिर् दख्षि-
णार्द्धन्त्रय ॥ [६५] ॥ इमे लोका इमानेव लोकानभि जयति त्रिरुत्तरार्द्धन्त्रयो वै देवयानाः
पन्थानस्तानेवाभि जयति त्रिरुप वाजयति त्रयो वै देवलोका देवलोकानेवाभि जयति द्वादश
सम्पद्यन्ते द्वादश मासाः सव्वँथ्सरः सव्वँथ्सरमेव प्रीणात्यथो सव्वँथ्सरमेवास्मा उप दधाति
सुवर्गस्य लोकस्य समष्ट्या आघारमा घारयति तिर इव ॥ [६६] ॥ वै सुवर्गो लोकः सुवर्ग-
मेवास्मै लोकम्प्र रोचयत्यृजुमा घारयत्यृजुरिव हि प्राणः सन्ततमा घारयति प्राणानामन्नाद्यस्य
सन्तत्या अथो रख्षसामपहत्यै यङ्कामयेत प्रमायुकः स्यादिति जिह्मन्तस्याऽऽघारयेत् प्राणमे-
वास्माज्जिह्मन्नयति ताजक् प्र मीयते शिरो वा एतद्यज्ञस्य यदाघार आत्मा ध्रुवा ॥ [६७] ॥
ऽऽघारमाघार्य ध्रुवाꣳ समनक्त्यात्मन्नेव यज्ञस्य शिरः प्रति दधात्यग्निर् देवानान्दूत आसीद्
दैव्योऽसुराणान्तौ प्रजापतिम्प्र श्नमैताꣳ स प्रजापतिर्ब्राह्मणमब्रवीदेतद्वि ब्रूहीत्या श्रावयेतीद-
न्देवाः शृणुतेति वाव तदब्रवीदग्निर् देवो होतेति य एव देवानान्तमवृणीत ततो देवा ॥ [६८] ॥
अभवन् पराऽसुरा यस्यैवव्विदुषः प्रवरम्प्रवृणते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति यद्ब्राह्म-

णश्चाब्राह्मणश्च प्रश्नमेयाताम्ब्राह्मणायाधि ब्रूयाद् यद् ब्राह्मणायाद्ध्याहा ऽऽत्मनेऽद्ध्याह यद्ब्राह्मणम्पराहाऽऽत्मानम्पराऽऽह तस्माद् ब्राह्मणो न परोच्यः ॥ [६९] ॥

(ध्रुवा देवा श्चत्वारिꣳशच्च) ॥ ११ ॥

आयुष्ट >१, आयुर्दा अग्न >२, आ प्यायस्व >३, सन्ते >४, ऽव ते हेड >५,उदुत्तमं >६, प्रणो देव्या >७, नो दिवो >८ , ऽग्ना विष्णू >९ ,अग्नाविष्णू >१० , इमम्मे वरुण >११, तत्त्वा या >१२ , म्यु दुत्यं >१३, चित्रं >१४॥ अपान्नपादा ह्यस्थादुपस्थञ्जिह्मानामूर्ध्वो विद्युतँव्वसानः। तस्य ज्येष्ठम्महिमानँव्वहन्तीर्हिरण्यवर्णाः परि यन्ति यह्वीः॥ स ॥ [७०] ॥ मन्या यन्त्युप यन्त्यन्याः समानमूर्वन्नद्यः पृणन्ति। तमू शुचिꣳ शुचयो दीदिवाꣳसमपान्नपातम्परि तस्थुरापः॥ तमस्मेरा युवतयो युवानम्मर्मृज्यमानाः परि यन्त्यापः। स शुक्रेण शिक्वना रेवदग्निर् दीदायानिद्ध्मो घृतनिर्णिगप्सु॥ इन्द्रावरुणयोरहꣳ सम्राजोरव आ वृणे। ता नो मृडात ईदृशे॥ इन्द्रावरुणा युवमद्ध्वराय नो ॥ [७१] ॥ विशे जनाय महि शर्म यच्छतम्। दीर्घप्रयज्युमति यो वनुष्यति वयञ्जयेम पृतनासु दूढ्यः॥ आ नो मित्रावरुणा>१५, प्र बाहवा >१६॥ त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्र मुमुग्ध्यस्मत्॥ स त्वन्नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ। अव यक्ष्व नो वरुणꣳ ॥ [७२] ॥ रराणो वीहि मृडीकꣳ सुहवो न एधि॥ प्रप्रायमग्निर् भरतस्य शृण्वे वि यथ् सूर्यो न रोचते बृहद् भाः। अभि यः पूरुम्पृतनासु तस्थौ दीदाय दैव्यो अतिथिः शिवो नः॥ प्र ते यक्षि प्र त इयर्मि मन्म भुवो यथा वन्द्यो नो हवेषु। धन्वन्निव प्रपा असि त्वमग्न इयक्षवे पूरवे प्रत्न राजन् ॥ [७३] ॥ वि पाजसा >१७, वि ज्योतिषा >१८॥ स त्वमग्ने प्रतीकेन प्रत्योष यातुधान्यः। उरुक्षयेषु दीद्यत्॥ तꣳ सुप्रतीकꣳ सुदृशꣴ स्वञ्चमविद्वाꣳसो विदुष्टरꣳ सपेम। स यक्षद् विश्वा वयुनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत्॥ अꣳहोमुचे >१९, विवेष यन्मा >२०, विन इन्द्रे >२१, न्द्र क्षत्र >२२ , मिन्द्रियाणि शतक्रतो >२३,ऽनु ते दायि >२४ ॥ [७४] ॥

(यह्वीः स मद्ध्वराय नो वरुणꣳ राजꣴ श्चतुश्चत्वारिꣳशच्च) ॥ १२ ॥

## समाप्ति कोर्वैः

(वि॒श्वरू॑प॒ स्त्वष्टे न्द्र॑ँव्वृ॒त्रं ब्र॑ह्मवा॒दि॒नः स त्वै नासो॑मयाज्ये॒ ष वै दे॑वर॒थो दे॒वा वै न॑र्चि ना य॒ज्ञो ऽग्ने॑ म॒हान् त्रीन् नि॑वीत॒ मायु॑ष्टे॒ द्वाद॑श)
(वि॒श्वरू॑पो॒ नैन॑ꣳ शीतरू॒रा व॒द्य वसु॑ पूर्वे॑द्युर् वाजा॒ इत्य ग्ने॑ म॒हान् नि॑वीत म॒न्या यन्ति॒ चतु॑ः सप्ततिः)
(वि॒श्वरूपो॒ ऽनु॑ ते दायि)

॥ हरिः ॐ ॥

### द्वितीयकाण्डे पञ्चमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| १२ | ७४ |

ॐ